# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा -शास्त्रीप्रथमवर्षम्** (SEM-1) | **प्रश्नपत्रम् – ६** | **गुणा: - ७०** |
| **विषय: - फलितज्यौतिषम्** | (C.C.- 1.1.2. New ) | |
| **दिनाङ्क: - २०/१२/२०१८** | **लघुजातकम् , षट्पञ्चाशिका ।** | **समय: -०२.०० त: ०५.००** |

**प्रथमान्विति:**

**प्रश्न: १  अधोलिखितेभ्य: कयोश्चिद् द्वयो: व्याख्यां कुरुत ।** **( १० )**

*(१)  आत्मादयो गगनगैर्बलिभिर्बलवत्तरा: ।*

*दुर्बलैदुर्बला ज्ञेया विपरीत: शनि: स्मृत: ॥*

*(२)  स्वच्छ: प्राज्ञो गौरश्चपल: कफवातिको रूधिरसार: ।*

*मृदुवाग् घृणी प्रियसखस्तनुवृत्तश्चन्द्रमा: प्रांशु: ॥*

*(३)  चन्द्रे लग्नपश्यति मध्ये वा शुक्रसौम्ययोश्चन्द्रे ।*

*जन्म परोक्षस्य  पितुर्यमोदये वा कुजे वाऽस्ते ॥*

**प्रश्न: २  कस्यचिदेकस्य उत्तरं लिखत ।** **( १० )**

*(१) ग्रहमैत्रीविचार: ।*

*(२) सूतिकाविचार: ।*

**द्वितीयान्विति:**

**प्रश्न: ३  अधोलिखितेभ्य: कयोश्चिद् द्वयो: व्याख्यां कुरुत ।** **( १० )**

*(१)  शोध्यक्षेपविशुद्ध: कालो यो येन जीविते दत्त: ।*

*स विचिन्त्या तस्य दशा स्वदशासु फलप्रदा: सर्वे ॥*

*(२)  जीव: सितेन बहुगुणमसितेन समन्वितोऽत्र घटकारम् ।*

*स्त्रीस्वं मन्देन सितस्त्रिभिरप्येवं फलानि वदेत् ॥*

*(३)  अबले सप्तभवने सौम्येक्षणवर्जिते च कापुरुष: ।*

*भवति पतिश्चरभेऽस्ते प्रवासशीलो भवेद् भ्रान्ति: ॥*

**प्रश्न: ४  अधोलिखितयो: कस्यचिदेकस्य उत्तरं लिखत ।** **( १० )**

*(१) द्विग्रह-योगफलम् । (२) स्त्रीजातकाध्याय: ।*

**तृतीयान्विति:**

**प्रश्न: ५  अधोलिखितेभ्य: कयोश्चिद् द्वयो: व्याख्यां कुरुत ।** **( १० )**

*(१)  चरोदये शुभ: स्थित: शुभं करोति यायिनाम् ।*

*अशोभनैरशोभनं  स्थिरोदयेऽपि वा शुभम् ॥*

(२) *द्वितीये वा तृतीये वा गुरुशुक्रौ यदा तदा ।*
*आश्वेवाऽऽगच्छति सेना प्रवासी च न संशयः ॥*

(३) *पुंवर्गे लग्नगते पुंग्रहदृष्टे बलान्विते पुरुषः ।*
*युग्मे स्त्रीग्रहदृष्टे स्त्रीबुधयुक्ते तु गर्भयुता: ॥*

**प्रश्नः ६ कस्यचिदेकस्य उत्तरं लिखत ।** **( १० )**

*(१) नष्टलाभज्ञानम् ।*

*(२) शुभाशुभलक्षणम् ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ दशप्रश्नानाम् उत्तराणि लेख्यानि ।** **( १० )**

*(१) लघुजातकस्य कर्ता कः ?*

*(२) लघुजातके कति अध्यायाः सन्ति ?*

*(३) लघुजातके कति श्लोकाः सन्ति ?*

*(४) मेषराशिनां स्वामि ग्रहः कः ?*

*(५) उपचयस्थानानि कानि ?*

*(६) के षड्वर्गाः ?*

*(७) केन्द्रस्थानानि कानि ?*

*(८) सहज कस्य भावस्य संज्ञा वर्तते ?*

*(९) जायाभाव अर्थात् कः भावः ?*

*(१०) सूर्यग्रहस्य नीचराशयः के ?*

*(११) षट्पञ्चाशिकायाः रचयिता कः ?*

*(१२) के चरराशयः ?*

*(१३) 'यायी'शब्दस्य कोऽर्थः ?*

*(१४) सूर्यस्य अवस्था कति वर्षात्मिका ?*

*(१५) बुधग्रहस्यदिशा का ?*

--००--